२सम्ब्रद्धे च “ता ह त्यद्वर्त्तिर्यदरध्रमुग्र त्या” ऋ० ६,६२, ३, अरध्रम् सम्ब्रद्धम् भा० ।

**अरन्तुक** न० कुरुक्षेत्रान्तर्गतसमन्तपञ्चकसीमाभूते स्थानभेदे । “तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च । एतत् कुरुक्षेत्रसमन्तपञ्चकम्” इति भा०व०प० ।

**अरन्धन** न० अभावे न०त० । पाकाभावे स च सिंह- संक्रान्तौ कन्यासंक्रान्तौ च विधेयः “कर्काद्भमद्यात् सिंहार्के सिंहान्नं सिंहकन्ययोः” । इत्याचारमार्त्तण्डोक्तेः तस्मिन् पर्य्युषितान्नभोजनविधानेन पाकाभावो गम्यते ।

**अरन्ध्र** त्रि० नास्ति रन्ध्रं छिद्रं यस्य । निविड़े छिद्ररहिते

**अरपस्** त्रि० नास्ति रपोदुरितं यस्य । पापशून्ये “शंयोर- रपोदधातन” ऋ० १०,१५,४, “तदस्मे शंयोररपोदधा- तन” ऋ० १०,३७,११ ।

**अरम्** अव्य० अल—अम् वा लस्य रत्वम् । १ वक्ष्यमाणेऽलमर्थे २ शीघ्रतायाञ्च । अरङ्कृतशब्दे अरङ्कृतिशब्दे च उदा० । ३ अत्यर्थे च । “तस्मा अरं गमावः” य० ११,५२ अरमिषे स्तवामहे मीलहुषे अरंगमाय जग्मये” ऋ०८,४६,१७ ।

**अरम** त्रि० न रम्यतेऽत्र आधारे घञ् । अधमे ।

**अरमति** स्त्री अरात्यर्था पर्य्याप्ता वा मतिः । १पर्य्याप्तबुद्धौ २दीप्तौ च । “स्वादस्मे अरमतिर्वसूयुः ऋ०७,३४,२१ । “उप त्वैनमरमतिर्वसूयुः” छा०उ० ।

**अरर** त्रि० ऋ-अरन् । १ कवाटे । “सरभसमररागि द्रागपाहत्य” वीर० च० । २अपिधाने ३ वंशकोषे विश्वः ४ ऋषिभेदे पु० । गर्गा० यञ् । आरर्य्यस्तदपत्ये पुंस्त्री०

**अररि** पु०न० ऋच्छति ऋ+विट्अरमियर्त्ति ऋ—इन् । कपाटे

**अररिन्द** न० रा-क्वि द्विस्व ररिर्दाता नास्त्यन्योररिरस्य पिपा- सोपशमस्य अररिं पिपासोपशमं ददाति दा-ख मुम् । जले निरु० । “अधारयदररिन्दानि सुक्रतुः” ऋ० १।२६।१० । भाष्ये प्रागुक्ता अन्या च व्युत्पत्तिर्दर्शिता । ‘यद्वा— अररिरितस्ततश्च गमनं औणादिकोऽरिप्रत्ययः । आतोऽनुपसर्गे कः पृषोदरादित्वादभिमतरूपस्वरसिद्धिः । तद्ददतीत्यररिन्दान्युदकानि चेष्टाप्रदानीत्यर्थः । ‘आपो- मयाः प्राणा” इति श्रुतेः । यद्वा ररिर्दानं न विद्यते तादृशं दानमितरस्तेषु तदररि अन्यैरदेयं लो- कोपकारि भोगं ददतीत्यर्थः” इति ।

**अररिवस्** त्रि० रा—क्वसु: ररिवान् न०त० । अदातरि । “योनो अग्ने अररिवाँ अघायुररातीः” ऋ० १,१४७,४ ।

**अररु** पु० ऋ—अरु । १शत्रौ सि०कौ० । २आयुधे उज्ज्वलद० ३ गमनस्वभावे त्रि० अररुं, शूर मर्त्यं परिवृणग्धि मर्त्यं ऋ० १,१२६,२, ‘अररु’ गमनस्वभावम्’ भा० ।

**अररुस्** पु० ऋ—अरुस् । अर्त्तेररुः इति” सूत्रं सान्तमिति माधवः । उपद्रवकर्त्तुमागते शत्रौ “मा नः शंसो अररुषो धूर्त्तिः’ ऋ० १,१८,३, । “अररुषः उपद्रवं कर्त्तुमस्मत्- समीपे प्राप्तस्य शत्रुरूपस्य मनुष्यस्य” भा० ।

**अररे** अव्य० अरं शीघ्रं राति रा—के । शीघ्रं प्रत्युत्तर लाभेच्छया कृते अतिव्यग्रतया संबोधने । तच्च नीचं प्रत्येव

**अरलु** पु० अरं लाति ला—कु—ऋ अरु कपिलका० रस्य लः वा । (शोना) श्योनाकवृक्षे । “अरलुत्वक्प्रियङ्गू च मधुकं दाड़िमाङ्कुरान् । अवाप्य पिष्ट्वा दधनि यवागूं साधयेद्- द्रवम्” सुश्रु० । स्वार्थे कन् “तत्रैव । कपोतवङ्कारलुको वरुणः पारिभद्रक” इति सुश्रु० ।

**अरव** पु० अभावे न०त० । १रवाभावे प्रतिषेधार्थक शब्दाभावे न०ब० । २तच्छून्ये त्रि० ।

**अरविन्द** न० अरान् चक्राङ्गानीव पत्राग्राणि विन्दते विद— श । पद्मे “सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् रघुः” “रविन्दधानेऽप्यरविन्दधाने” माघः “रागेण श्रिय- मरविन्दतः कराग्रैः” माघः २सारसपक्षिणि ३ नीलोत्- पले, ४ रक्तकमले ५ ताम्रे च । [नाभे विष्णौ ।

**अरविन्दनाभ** पु० अरविन्दं नाभौ यस्य अच् समा० । पद्म-

**अरविन्दाक्ष** त्रि० अरविन्दमिव मनोहरमक्षि यस्य षच् समा० स्त्रियां ङीष् । १ पद्मसदृशनेत्रे २ पुण्डरीकाक्षे विष्णौ पु० । “पद्मनाभोऽरविन्दाक्षः” विष्णुसह० ।

**अरविन्दिनी** स्त्री अरविन्दस्य सन्निकृष्टदेशादि इनि ङीप् । १पद्मयुक्ते देशे २पद्मलतायाञ्च । तेषां संघः इनि । ३ पद्मसमूहे ।

**अरश्मन्** त्रि० नास्ति रश्मिरस्य वेदे बा० अनिच्समा० । प्रग्रहरज्जुरहिते रथादौ “अरश्मानो येऽरा अयुक्ताः” ऋ० ६,६,७,२,० । “अरश्मानो रज्जुरहिताः” भा० ।

**अरस** पु० अभावे न०त० । १ आस्वादाभावे । रस्यते आस्वाद्यते कर्म्मणि अच् । आस्वाद्यं मधुरादि न०त० । २ मधुरादिरसभिन्ने ३ अप्रकृष्टरसे । न०ब० । ४ रसशून्ये त्रि० “अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्” श्रुतिः ५ असारे त्रि० । ‘वृश्चिकस्यारसं विष- मरसं वृश्चिक! ते विषम्” ऋ० १,१९१,१६, “अरसम- सारमिति भा०” । रसं वेत्ति अच् न०त० । रसज्ञभिन्ने । “किमस्यानाम स्वादरसपुरुषानादरभरैः” नैष० ।